श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीजग्गुरु सिङ्गरय्यङ्गरविरचितं

# ॥ श्री लक्ष्मीवेङ्कटेश्वरभुजङ्गस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीवेङ्कटेश्वरभुजङ्गस्तोत्रम् ॥

भुजङ्गाचलाग्रस्थहेमालयान्तः -
स्फुरन्नीलरत्नत्विषा विग्रहेण।
मुहुर्भासयन्तं सुखान्तं महान्तं
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 1 ॥

स्फुरद्रत्नभास्वत्किरीटाभिरामं
ललाटस्थकर्पूरचूर्णोर्ध्वपुण्ड्रम्।
मनाङ्मन्दहासाधरोष्ठास्यपद्मं
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 2 ॥

कृपापूर्णसौम्येक्षणाब्जावलोकैः
नतानेकभूतौघरक्षैकदीक्षम्।
मणिस्तोमकान्तिच्छटाकर्णपूरं
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 3 ॥

कराग्रोल्लसच्छङ्खचक्रायुधाढ्यं
रमावासरम्यायतोरोप्रदेशम्।
लसत्पीतवासःप्रभारञ्जिताङ्गं
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 4 ॥

अनर्घस्फुरद्रत्नभूषाविशेषैः
अनेकैस्सदालङ्कृतं मङ्गलाङ्गम्।

सुगन्धिप्रसूनावलिस्रक्सुरम्यं
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 5 ॥

पदाब्जं श्रयध्वं ममेत्यादरेण
ब्रुवाणं स्वभक्तान् करन्यासभङ्ग्या।
जगज्जन्मरक्षाक्षयादिस्वलीलम्
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 6 ॥

भवाब्धिर्भवेज्जानुदघ्नं श्रितानाम्
इति व्याहरन्तं करेणापरेणा।
धृतार्चावतारं परं ब्रह्म नित्यं
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 7 ॥

पदाब्जाश्रितानेकदेवाधिपानां
किरीटस्थरत्नप्रभाभासिताङ्घ्रिम्।
त्रिलोकैकनाथं त्रयीमौलिवेद्यं
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 8 ॥

धनं भक्तलोकैरनेकैर्गृहीत्वा
तदीयां समस्तां विपत्तिं निवार्य।
अभीष्टानि दत्त्वा समस्तानवन्तं
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 9 ॥

नमः श्रीनिवासाय सर्वान्तरात्मन्
नमस्तेऽस्तु पद्मावतीवल्लभाय।
नमो वेङ्कटाद्रिस्फुरत्कालमेघ
प्रपन्नार्तबन्धो नमस्तेऽस्तु नित्यम् ॥ 10 ॥

॥ इति श्री लक्ष्मीवेङ्कटेश्वरभुजङ्गस्तोत्रं समाप्तम् ॥